Andhakakritam 5 Shiva Stotram

# અન્ધકકૃતં ૫ શિવસ્તોત્રમ્

## Document Information

Text title : Andhakakritam 5 Shiva Stotram

File name : andhakakRRitaM5shivastotram.itx

Category : shiva, skandapurANa, stotra

Location : doc_shiva

Proofread by : PSA Easwaran

Description/comments : skandapurANa | AvantyakhaNDa | AvantyakhaNDa | adhyAya 38/11-24||

Latest update : June 24, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 24, 2025

*sanskritdocuments.org*

# અન્ધકકૃતં ૫ શિવસ્તોત્રમ્

અન્ધક ઉવાચ ।
કૃત્સ્નસ્ય યોઽસ્ય જગતઃ સચરાચરસ્ય
કર્તા કૃતસ્ય ચ તથા સુખદુઃખદાતા ।
સંસારહેતુરપિ યઃ પુનરન્તકાલે
તં શઙ્કરં શરણદં શરણં વ્રજામિ ॥ ૧૧॥

યં યોગિનો વિગતમોહતમોરજસ્કા
ભક્ત્યૈકતાનમનસો વિનિવૃત્તકામાઃ ।
ધ્યાયન્તિ યેઽખિલધિયોઽમિતદિવ્યભૂતિં
તં શઙ્કરં શરણદં શરણં વ્રજામિ ॥ ૧૨॥

યશ્ચન્દ્રખણ્ડમમલં વિલસન્મયૂખં
બદ્ધ્વા સદા સુરસરિચ્છિરસા બિભર્તિ ।
યસ્યાર્ધદેહમભજદ્ગિરિરાજપુત્રી
તં શઙ્કરં શરણદં શરણં વ્રજામિ ॥ ૧૩॥

યઃ સિદ્ધચારણનિષેવિતપાદપદ્મો
ગઙ્ગાં મહોર્મિવિષમાં ગગનાત્પતન્તીમ્ ।
મૂર્ધ્ના દધે સ્રજમિવ ત્રિજગત્પુનન્તીં
તં શઙ્કરં શરણદં શરણં વ્રજામિ ॥ ૧૪॥

કૈલાસશૈલશિખરં પ્રવિકમ્પ્યમાનં
કૈલાસશૃઙ્ગસદૃશેન દશાનનેન ।
યઃ પાદપદ્મપરિપીડનસેવ્યમાન-
સ્તં શઙ્કરં શરણદં શરણં વ્રજામિ ॥ ૧૫॥

દક્ષાધ્વરે ચ નયને ચ તથા ભગસ્ય
પૂષ્ણસ્તથા દશનપઙ્ક્તિમશાતયદ્યઃ ।
વ્યષ્ટમ્ભયત્કુલિશહસ્તમથેન્દ્રમીશં

તં શઙ્કરં શરણદં શરણં વ્રજામિ ॥ ૧૬॥

યેનાસકૃદ્દિતિસુતાશ્ચ દનોઃ સુતાશ્ચ
વિદ્યાધરોરગગણાશ્ચ વરૈઃ સમગ્રૈઃ ।
સંયોજિતા મુનિવરાઃ ફલમૂલભક્ષા-
સ્તં શઙ્કરં શરણદં શરણં વ્રજામિ ॥ ૧૭॥

એવં કૃતેઽપિ વિષયેષ્વપિ સક્તભાવા
જ્ઞાનેન ચ શ્રુતગુણૈરપિ તેન યુક્તાઃ ।
યં સંશ્રિતાઃ સુખભુજઃ પુરુષા ભવન્તિ
તં શઙ્કરં શરણદં શરણં વ્રજા મિ ॥ ૧૮॥

બ્રહ્મેન્દ્રવિષ્ણુમરુતાં ચ સષણ્મુખાનાં
યોઽદાદ્વરાન્સુબહુશો ભગવાન્મહેશઃ ।
સૂતં ચ મૃત્યુવદનાત્પુનરુજ્જહાર
તં શઙ્કરં શરણદં શરણં વ્રજામિ ॥ ૧૯॥

આરાધિતસ્તુ તપસા હિમવન્નિકુઞ્જે
ધૂમ્રવ્રતેન તપસા ચ પરૈરગમ્યઃ ।
સઞ્જીવનીં સમદદાદ્ભૃગવે મહાત્મા
તં શઙ્કરં શરણદં શરણં વ્રજામિ ॥ ૧.૩૮.૨૦॥

ક્રીડાર્થમેવ ભગવાન્ભુવનાનિ સપ્ત
નાનાનદીવિહગપાદપમણ્ડિતાનિ ।
સબ્રહ્મકાનિ સસૃજે સુકૃતાભિધાનિ
તં શઙ્કરં શરણદં શરણં વ્રજામિ ॥ ૨૧॥

યઃ સવ્યપાણિકમલાગ્રનખેન દેવ-
સ્તત્પઞ્ચમં પ્રસભમેવ કરાલરન્ધ્રમ્ ।
બ્રાહ્મ્યં શિરસ્તરણિપદ્મનિભં ચકર્ત
તં શઙ્કરં શરણદં શરણં વ્રજામિ ॥ ૨૨॥

યે ત્વાં સુરોત્તમગુરું પુરુષા વિમૂઢા
જાનન્તિ નાસ્ય જગતઃ સચરાચરસ્ય ।
ઐશ્વર્યમાનવિગમેઽનુશયેન પશ્ચા-
ત્તે યાતનામનુભવન્તિ યથાહમેવ ॥ ૨૩॥

યઃ પઠેત્સ્તુતિમિમાં શુચિકર્મા યઃ શ઼ૃણોતિ સતતં શિવભક્તઃ ।
વિપ્રસંસદિ સદા શુભકર્મા સ પ્રયાતિ શિવલોકમખણ્ડમ્ ॥ ૨૪॥

ઇતિ શ્રીસ્કન્દપુરાણે આવન્ત્યખણ્ડે અવન્તીક્ષેત્રમાહાત્મ્યે અષ્ટાત્રિંશાધ્યાયાન્તર્ગતં
અન્ધકકૃતં શિવસ્તોત્રં સમાપ્તમ્ ।

સ્કન્દપુરાણ । આવન્ત્યખણ્ડ । આવન્ત્યખણ્ડ । અધ્યાય ૩૮/૧૧-૨૪॥

skandapurANa . AvantyakhaNDa . AvantyakhaNDa . adhyAya 38/11-24..

Proofread by PSA Easwaran

*Andhakakritam 5 Shiva Stotram*
pdf was typeset on June 24, 2025

Please send corrections to *sanskrit@cheerful.com*